काव्यप्रकाशः प्रदीपाभिधव्याख्यासहितः

५८७ ४१

[illegible]

[illegible]

का·प्र ॥श्रीगणेशायनमः श्रीलक्ष्मीनृसिंहाभ्यांनमः॥ सोनोदेव्याःप्रथमतनयःकेशवस्यात्मजन्मा श्रीगोविंदोरुचिक
१ रकवेःस्नेहपात्रंकनीयान् श्रीमन्नारायणचरणयोःसम्यगाधायचित्तेनत्वासारस्वतमपिमहःकाव्यतत्वंव
नक्ति १ वचनसंदर्भविशेषरूपस्यग्रंथस्यप्रारिप्सितस्तेनस्तोतुमुचितायाःसेव्यमानायाश्चवाग्देव्याआ
स्पदभूताकविभारतीतदभिन्नत्वेनाध्यवसितांप्रारिप्सितप्रतिबंधकदुरितशांतयेग्रंथकृत्संस्मरति नियत
तिकृतनियमरहितांल्हादैकमयीमनन्यपरतंत्रांनवरसरुचिरांनिर्मितिमादधतीभारतीकवेर्जयति नियत
म्यंतेसौरभाद्योधर्माअनेनेतिनियतिरसाधारणःपद्मत्वादिरूपोधर्मो अदृष्टंवाल्हादैकमयीमिति॰ल्हा
देनएकमयीमिकस्वभावांल्हादमात्रस्वभावामितियावत्॰ अनन्यपरतंत्रामिति कवेस्तत्प्रतिभायाश्चामौ
यश्चात्मनःपरस्तदायत्तत्वरहितं परतंत्रशब्दएवापन्नवचनइतिकश्चित्॰नवरसरुचिरामितिकमधा
रयःहृद्योषड्सानचत्वद्येवेतेरितिव्यतिरेकदृष्टपदर्शनात्॰।नचैवंत्वद्येवतेरितिहेतूपदर्शनवैयर्थ्यं॰ते
तिक्तादिसाधारणःषड्सेरूपलक्षितापतोअतोनचहृद्येवेतितदर्थत्वात् अस्तुवात्तृतीयातत्पुरुष रम्यः
एव॰नचैवंनवरसीतिरूपप्रसंगः त्रिगुणमविवदित्यादिवदुपपत्तेः नचद्वतिविरोधःनवरसरुचिरत्वरू १

पविशिष्टधर्मव्यतिरेकस्तत्रम्परसेषु नवत्वाभावेन अप्रयोगव्यवच्छेदित्वघटत्वप्रयोजकत्वविरहेणावेति हृन्निभति
यावत्वात्. अत्र निर्माणव्यतिरेकमुखेन वनुमेरवात्कविभारस्याव्यतिरेकालंकारो यं रूपः तथाहि निपतेः श
त्मानियतरूपामुखदुःखमोहात्मकसत्वरजस्तमोलक्षणगुणत्रयात्मकत्वादिश्वस्य सुखदुःखमोह
स्वभावाः परमाणवादिय त्समवायिकारणात दीपश्चयः स्पंदः तत्र प्रमतिसहकारि परतेत्रा मधुरादिषु
साध्व. न च मनोरमेवतेर्निर्मितत्वादिसाहश्यवती च अप्रयोगोनिर्मितिरिति सुप्रसिद्धमेव. एतच्छिलसणानि
पतिकृतनियमरहितत्वादिधर्मवत्वेन तु कविभारतीनिर्मितिर्नहि वेनियमो व्यतिरेकः यदेतादृशधर्मशालि
नीअत एव जयति उत्कर्षेणावर्त्तते इत्यर्थः न तु वर्त्ततामित्यर्थः तथा सत्युत्कर्षस्यासिद्धत्वेन न नमस्कारासे
पकत्वानुपपत्तेः न त्वेतादृशोगुरुकर्मणि आमे क्षावतामिष्टदेवतास्मरणातिरेकशून्यः दृश्यते प्रतिमतीच. तदने
न स्मृतिमात्रमाचरतां यत्तनकृतातदवलेपादज्ञानाद्वा अभयथाप्यनवधेयवचनतामसत्को. अत्र थक
तैव तत्किं स्मृति वन्नोपनिबद्धा. विशेषाभावात्सैव वा किं नोपनिबद्धेति चेत् उच्यते खलु नुतिमात्रोपनिबं न्द
धेस्मृतिर्निबद्धाभवति सुतिनिबंधे त्वर्थान्नतिरपि सिद्धैव. प्रणोजयन्त्य यैवकृविषयस्य चवेशि ष्यान्नस्का

नº

वत्यवक्तारगांतरयुक्तम् प्रणामरूपव्यङ्ग्यस्यान२

का॰प्र॰ रत्राक्षिप्यते तेनानंतोभ्यस्मिन्नरागानंद इति लभ्यते एतत्तु मकाव्यत्वसिद्धये व्यंग्यं दर्शयति जपमर्थेन वेमादौ इति श्र
२ पिनो व्यतिरेकालंकारस्यैवोपमामोचित्यादिति इहाभिधेयं यथरूपमंगिनः काव्यस्य फलेन सफलं मि
ति प्रेक्षावत्प्रवृत्त्यर्थं प्रतिपादयितुमाह काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृ
तये कांतासंमितातयोपदेशयुजे अत्र कृतवित् एवं शब्दाभावेपि किं वताः काव्यं लोकोत्तरवर्णनानिपु
णस्य कवेरसाधारणता दृवर्णनाक्रमकं कर्मं तत्कवेस्तावत्कालिदासादीनामिव यशः श्रीहर्षा
देर्धावकादीनामिव धनं मयूरशर्मादीनामिवानिष्टनिवारणं च करोति सहृदयस्य तु
काव्यश्रवणानंतरमेव सकलप्रयोजनेषु उत्तमं रसादिविभावास्वादनसमुद्भूतं वेद्यांतरसंपर्कशून्यं रसा
स्वादरूपमानंदं राजादिगतपृथ्वीपालनादिसमुचिताचारपरिज्ञानं रामादिवद्वर्त्तनमिष्टसाधनं न
तु रावणादिवदित्युपदेशं च निर्मिमीते काव्यास्वादनकाले कवेरपि सहृदयतः यातित्वाद्रसास्वादः
ननूपदेशार्थिनीतिशास्त्राण्येव संति किं तत्र काव्येनेत्यत उक्तं कांतासंमिततयेति शब्दस्तावत्त्रिविधः राम:
प्रभुसंमितः सुहृत्संमितः कांतासंमितश्च तत्राद्यः शब्दप्रधानो वेदादिः शासनप्राधान्येन विधिलक्षणः २

सहि प्रभुरिव त्वमेवं कुर्विति समाज्ञापयति तत्र च नियुक्तः सेव्यावेदनादौ निःफले प्रवर्त्तते· द्वितीयस्तु यथैता
त्पर्यवानसिद्धार्थरूपः पुराणेतिहासादिः स हि सुहृदिव एवं कृते इदमिष्टं भवत्येवं च कृते इदमनिष्टमि
त्येतावन्मात्रं बोधयति न त्वाज्ञापयति· तृतीयस्तूभयविलक्षणो रसप्रधानः काव्यलक्षणः तत्र हि
रसोङ्गीभूतो व्यापारो विभावादिसंयोजनात्मा व्यञ्जनारूपो वा तन्निष्पाद्यरसाभिव्यक्तिनिष्पादकत्वपा
शब्दार्थयोर्गुणत्वाद्रसस्यैव प्राधान्ये· स च कान्तासम्मितत्वेनोपदेशं करोतीति तेनैतदुक्तं भवति· ये सुकुमा
रमतयो ऽतिसुखितस्वभावाः राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्त्तयितुमशक्यास्तान्काव्यकान्तेव सर
सतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति· गुडजिह्विकया शिशूनिव कट्वौषधं पटवः स्वादुकाव्यर
मुं ४ सोन्मिश्रं शास्त्रमप्युपभुञ्जते· प्रथमलीढमधवः पिबन्ति कटुकौषधमिति· ननु एवंविशिष्टं काव्यमस्त
स्तद्धेतुरुपादेयः नन्वेवमभिधेये ऽर्थे किमायातं· किं च हेतुमज्ञात्वा तदुपादानं कथं स्यादित्याकांक्षायां
काव्यज्ञशिक्षाद्युपतया काव्याङ्गत्वं प्रथमप्रतिपादयन्नेव कारणान्तरमप्याह। शक्तिर्निपुणता लो
कशास्त्रकाव्याद्यवेक्षणात्· काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे शक्तिः कवित्वबीजम् तो देवना

का·प्र· प्रसादादिजन्मा संस्कारविशेषः प्रतिभाव्यपदेश्यः तस्याः कारणतापन्नं किं मानमिति चेत्· निपुणतादिकारणा
२ न्तरसद्भावेप्यनुपहसनीयकाव्यप्रसरस्य कार्यस्याव्यतिरेकः स च विशेष्यस्य काव्यप्रसरस्य विशेषणस्या
३ नुपहसनीयत्वस्याव्यतिरेकात्सर्वत्रैवाविशिष्टः न चैवं कारणान्तरं किं विदायातु न तु शक्तिरिति काव्य· प्र
सिद्धातिरेकिण एव तद्धेतो शक्तिव्यपदेशात् लोकः स्थावरजंगमात्मकलोकवृत्तं योगादुपचाराद्वा धर्मिमा
त्रपरामर्शस्य कृत्स्नस्यनाधायकत्वात्· शास्त्रं छंदः शास्त्रं दिकाव्यं महाकविप्रणीतं रघुवंशादि· आ
दिग्रहणाद्यपरामर्शस्य कृत्स्नस्यनाधायकत्वात्· शास्त्रं छंदः शास्त्रं दिकाव्यं महाकविप्रणीतं रघुवंशा
दि· आदिग्रहणादितिहासादि तेषां विमर्शनाद्व्युत्पत्तिर्निपुणता· काव्यज्ञशिक्षया काव्यं कर्तुं रसानुगुणात्
याप्रबंधाद्यघटप्रत्युचपेज्ञानेतितदुपदेशः तथा करणे योजने च यौनःपुन्येन प्रवृत्तिरभ्यासः इति शक्त्यादि मि
लितोपस्थापनापः अन्यथा तद्धेपर्थ्यमेव स्यात्· तथा च काव्यास्योद्भवः उत्कृष्टोत्पत्तिस्तया कार्येण मिलिता
नामुपधानं दंडचक्रादीनामिव घटेन न तु मिलितत्वेन कारणानेवेति भ्रमः कर्तव्यः एवं कारणमुक्त्वा काव्यस्य एवः
लक्षणमाह· तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि· निर्दोषत्वादिविशेषणविशिष्टौ शब्दार्थौ ३

तत्काव्यमिति व्यवहर्तव्यो गुणस्य रसनिष्ठत्वेपि तद्व्यंजकपरं गुणपदं । न त्वनलंकारेति व्याप्तिः सालंका
रत्वविशेषणानुपादानादिति न वाच्यं यतः क्वापीत्यनेनैव तदुक्तं यत्सर्वत्र सालंकारौ शब्दार्थौ काव्यं क्वचित्तु
स्फुटालंकारविरहेपि न काव्यत्वहानिः नत्रोसार्थत्वादस्य लक्षणस्य चास्फुटत्वएव विश्रामात् । नारसेप्यस्फुटालं
कारे काव्यत्वमिष्टमेवेति ऋजुः पथाः व यतुप श्यामः नीरसे स्फुटालंकारविरहितानि काव्यत्वं । यतो रसादि
रलंकारश्चद्वयं चमत्कारहेतुः तथा च यत्र रसादीनामवस्थानं नचालत्र स्फुटालंकाराये सा । अत एव बंध
निकारे रोतत्कं रसानुगुणाथ विशेषनिबंधनमलंकारविरहेपि छायातिशयं पुष्णाति यथा । मुनिर्ज
यति योगींद्रो महात्मा कुंभसंभवः येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ अत्र हि अद्भुतरसानु
गुणमेकचुलके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णातीति नीरसे तु यदि स्फुटोलंकारो न स्यात्किंकृ
तः चमत्कारः स्यात् चमत्कारसारं च काव्यमिति अवश्यं स्फुटालंकाराये सा अनलंकृती पुनः क्वा
पीत्यनेनापि अस्फुटालंकारे क्वचिदेव काव्यत्वं यत्र रसादिः स्फुटो न तु सर्वत्रेत्येतदेव प्रतिपाद्यते त
स्मात्सालंकारत्वमात्रेण विशेषणो किंतु स्फुटालंकारसाधम्यनतरवत्वं नचैवमपि रसवत्यनलंकारेका

का.प्र. अलवत्संगोपेयाय रसस्योपत्तेः यथाउदाहृते मुनिर्जयति योगीन्द्रो यदि तु स्फुटालंकारेण नन तत्रापि काव्यत्वसमान
४ दालंकारवत्त्वसत्त्वास्यपि पूरणीयमिति स्फुटालंकारविरहे काव्यत्वं यथा यः कौमारहरः स एव हि वरस्ता
एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः सा चैवास्मि तथापि तत्र सुरतव्यापारली
लाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते अत्र रूपकादि नाम संभवत्येव अत्र स्फीतस्य स्वविभ
क्तिविपरीतत्वादस्य दीपकमिति चेत् न अस्मीत्यस्याहमर्थकाव्ययत्वात् अत्रास्मि करोमि सत्वाद्
निवत् क्रियापदत्वेपि न दीपकत्वं तदुक्तिता नो सर्वेषां प्राकरणिकत्वात् दीपकस्य तु प्राकरणिकाप्राक
रणिकविषयत्वात् सादृश्याप्रतीतेश्च न तुल्ययोगिता समुच्चयोपि च क्षमारूपलक्षणेन संभवत्येव अ
अतादृशश्च न वा हेतुत्वं हेतुः विशेषोक्तिविभावने विद्यमानेऽपि न स्फुटे कथमिति चेत् इत्थं विशेषोक्ति
स्तावत् कारणसत्त्वेपि कार्याभाववचनं अत्र चानुत्कंठाकारणानां बलवत्करणयोः स्तंभयुक्तानां तत्त्वेपि
पि नुत्कंठाभावरूपकार्यानिर्दिष्ट एवं तथापि नानुत्कंठाभावत्वेन किंतूत्कंठात्वेनैव तस्मादस्फुटत्व रामः
मस्याः पदिवेतोनुत्कंठितेन न समभिधीयते न तदा स्फुटत्वमवेत् एवं कारणाभावेपि कार्योत्पत्तिवचनं वि ५

भावना· अत्र चोक्तं ठक्कुरेण विशेषकरणायोगेन तत्तानद्भावश्चेत्क एव यद्यपि तथापि नातत्ताविरहस्तेन किं
तु तत्तारूपैरोव· अभावाभावस्य तत्त्वात्· अतो अस्या अस्फुटत्वमेव· न च स एवेत्येवकारेणातत्ताभावप्रती
तेरतत्ताभावत्वेन प्रतीतौ कथमस्फुटत्वमिति वाच्यं विशेषणसंगतेनैवकारेण विशेष्यविशेषणायो
गस्य व्यवच्छेदो हि प्रत्याय्यते न तु विशेषणाभावाभाव एवाहमस्य पर्यवसाने नु तत्रैवास्फुटत्वमेव एवं विशेष्य
संगतेनाथैवकारेणाविशेष्यभिन्ने विशेषणाभाव एव नाद्य प्रत्याय्यते किं तु विशेषणायोगाभाव इति इह
मन्त्र तस्य च शेरवः पांडुर एव स्यात् दोनापांडुर इति· पार्थ एव धनुर्धर इत्यादौ च नान्यो धनुर्धर इत्यादिकदाचि
त्स्फुटतार्थं प्रयुज्यते इत्यप्याहुः तन्न खलु त्वं मुखेनैव तु संनाम्येन केन चित् इति· अन्यथा पुनरुक्तिरस्तत्रास्या
दिति· अनयोरस्फुटत्वे संदेहरूपसंकरोऽप्यस्फुट इति विभावनीयं शृङ्गाररूपरसरूपरसस्य सलाङ्गत्ववदलं
कारः स्फुट एवेति चेत् नारसस्यात्र प्राधान्यात् अप्राधान्य एव तस्यालंकारत्वोपगमात्· अर्वाचीनास्त्वप
योक्तस्य काव्यलक्षणे काव्यलक्षणं प्रविरलविषयं निर्विषयं वा स्यात् प्रयोजनं केषु स्फुटत्वमिति रि
क्तं स्पष्टं पदं स्पष्टं दर्शनीमतं ते स्पष्टा अस्फुटमाचेष्टं पंचप्रथमकोऽलेलस्फुटत्वं दोषा यादुर्वारत्वा

क.प्र त्.। न स्याद्वाक्यं रसात्मकं काव्यमिति तदप्यसंगतं तथा च दुष्टेपि रसान्वये काव्यत्वमस्त्येव परं तु अपकर्षमा
५ त्रं तदुक्तं। कीटानुविद्धरत्नादिसाधारण्येन काव्यता-दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुट इति एवं चाल
5 कारादिमत्त्वे उत्कर्षमात्रं-नीरसे तु चित्रादौ काव्यव्यवहारो गौणः इत्याहुः। अथ काव्यभेदानन्तलक्षणं
निर्वाहाद् इदमुत्तममतिशयिनि व्यंग्ये वाच्याद्ध्वनिर्बुधैः कथितः इदं काव्यं वाच्यादतिशयिनि अधिक
चमत्कारकारिणि व्यंग्ये उत्तमं-पदादिभिः पदैः स्फोटरूपशब्दब्रह्म व्यज्यते तस्मात् ध्वनिवत्कादर्थमस
यः तादृशस्य स्फोटव्यंजकस्य पटादिशब्दस्य ध्वनिरिति संज्ञेति वैयाकरणानां सिद्धान्तसरणिः। अ
तः प्रधानीभूतव्यंग्यव्यंजकत्वसाधर्म्यात् तत्सरणीं भजता व्यंग्यप्राधान्यं तद्व्यंजनक्षमस्य शब्दार्थयुगलरू
पस्योत्तमकाव्यस्य बुधैर्ध्वनिपदेन ध्वनिरिति संज्ञा कृतेत्यर्थः। निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरा
गोऽधरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकं। अत्र दूति कमेव रन्तुं गतासीति प्राधान्येनाधमप एमः
देन व्यज्यते नन्वत्र मुख्यार्थबाधाद्विपरीतलक्षणया तेनेति कमेव गतासीति लक्ष्यमेव युज्यते न ५

तुव्यंग्यमस्ययासाहेतीमादिवत्क्षमारणालक्षणामूलव्यंजनोदाहरणेविपरीतलक्षणानस्यात्विशेषा
भावादितिअत्रकेचित् । तस्मादत्रविपरीतलक्षणामहत्त्रियथस्कतादंतिकमेवगतासीत्यत्रलक्ष्यतइतिशेषकल्प
नपायोजनीयः अस्यतस्त्रिकिरेनुमित्यनेनेवान्वीयतइत्याहुः पुरमार्थतस्तु नवलकत्वमुख्यान्वयायोगस्वरूप
सक्ष्म शेषकल्पनमनुपयोजनीयः अस्मात् तिसुमित्रेलक्षणाबीजं किंतु ज्ञातं यावपत्रसख्यादेः प्रसाध्यकामु
कादिसंभोगाः प्रमाणांतरेणबोतुः प्रतीतिमुपगतः । तत्रमुख्यार्थबाधादलक्ष्यलक्षणातदभिप्रायेणोदासाहे
तोसहिमुहस्त्रउपकृतंबहुनामेत्युदाहृते पत्रप्रमाणांतरेणनतत्त्वायकमेवतरतितत्तच्छाकेजनितमसंबम
हिमैवतुतन्न्ययस्तत्रकथंलक्षणाबाधाभावात् । उभयत्रापिवाक्यार्थबोधेभवत्रपिवाधोऽकिंचित्करएवात
दभिप्रायेणवापीस्नातुमित्युदाहृतं । अतएवोक्तमधमपदेनव्यज्यतइति । अतएवचपत्रसख्यादेस्तादृशत्वे
नप्रमाणांतरेणावगतेतत्रनसाहेतीमादौविपरीतलक्षणाव्यंग्यार्थप्रतीतिर्बो वापीस्नातुमित्यादौतुबाधा
नवताऽऐव्यधमपदार्थपर्यालोचनेयापयोक्तव्यंग्यमतीयतएवइत्थंप्राधान्यमधमपदस्यतस्मात्साहे
तोसादौपरिव्यंजनानलक्षणामूलैव वापीस्नातुमित्यादौतुननियमः अतादृशीगुणीभूतव्यंग्यध्वेय
तुमध्यम अतादृशीवाच्यादनतिशायिनि अतिशयितचमत्कारणाधायकेव्यंग्येमध्यमकाव्यंतद्गुणी

का.प्र. भूतव्यंग्यंप्राक्कथितमित्यवगम्यते।अत्रव्यंग्यस्फुटत्वेऽपि इत्यर्थः।तेननाधमकाव्यापित्तिरिति केचित्तन्मतमयुक्तं
६ अगूढमपरस्यांगमित्यादिना गुणीभूतव्यंग्यप्रभेदत्वेन प्रतिपिपादयिषमाणानामस्फुटव्यंग्यस्यासंग्रहापत्तेः
6 किंत्वस्फुटतरातिरिक्तव्यंग्यपरं स्फुटगुणीभूतव्यंग्येप्यस्फुटमात्रव्यंग्ये अधमकाव्यत्वस्फुटतरं तद्विरहश्चैवे १२
तिनकाचिदनुपपत्तिः उदाहरणं ग्रामतरुणं तरुण्या नववंजुलमंजरीसनाथकरं पश्यन्त्या भवति मुहुर्नि
तरां मलिना मुखच्छाया अत्र वंजुललतागृहे दत्तसंकेता न गतेति व्यंग्यं तच्च गुणीभूतं तदवसे
पाव्यस्यैव चमत्कारकारित्वात् पश्यन्त्या नितरां मुखच्छाया मलिना भवतीत्यनेन दर्शनकालेप २
वत्लकायैमालिन्यं तस्यातिशयः स तन्मानतावितिवाच्यचमत्कारित्वभावत्वेन विमलेभवोबकंप्रतीय
तइति शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतं अत्र चित्रमित्यध्याहार्यं तेनाव्यंग्यकाव्यमवरमधमंत
च्चित्रमितिकथितमित्यर्थः। अव्यंग्यं। अस्फुटतरातिरिक्तव्यंग्यरहितं नादर्शवास्फुटेतरव्यंग्यसम्भवाषेपा
ग्यमात्राभावे वा चित्रं गुणालंकारयोगि शब्दचित्रमाद्यं यथा स्वच्छंदोच्छलदच्छकच्छकुहरच्छातेतरांभश्छ एमः
टामूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमहो ६

र्मिम हरमदामंदाकिनीमंदतो। हस्यश्चासौ चशशाङ्कालंकारः। ननु कथमेतद्व्यंग्यमुच्यते मंदाकिनीविषयाः
प्रीतेरभिव्यक्तेः। किंचनासौ वस्तु काव्यार्थोपस्थापनव्यंजकत्वेनाङ्गं ततो विभावत्वेनापीति चेत्सत्सु किं तु तद्व्यंग्यम
स्फुटतरं पद्यान्तरनवेक्षणात्पर्यं चाङ्गं तु प्राससमात्र एव तस्य संरंभात्। नात्र तु विषये विषयीभूतव्यंग्यविहितबलमे
वगाव्यंग्यपदेन विवक्षितं पदक्रमध्वनिकृता रसभावादिविषयविवक्षायां विवरहेमस्ति। अलंकारनिबंधा
पः सचित्रविषयो मत इति। अत्र पद्ये मध्यमकाव्यलक्षणे व्यंग्यपदं विवक्षितव्यंग्यपरं तु एवं व्यंग्यार्थवि
त्वं यथा विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यं ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलि
ताक्षीव भियामरावती। अत्र उत्प्रेक्षालंकारः। पातु रसादौ कथं तात्पर्यविरहात्। स्फुटतरत्वं च तत्प्रता
पते हयग्रीवस्य वर्णनीयतया तत्प्रभावस्य स्फुटप्रतीतेः। मदीपं तु पद्यजदाहेरगाय यथा मध्ये मस्त ओ५
रति सुमनोधन्वनः श्यामाचक्रे मंदाकिन्या विपुलपुलिनाभ्यागतो राजहंसः। अन्येद्युर्दलितचर
णाभ्यासमभ्याकाशलक्ष्मीः संसर्पत्साः प्रवलाय पतितं पुंडरीकं मरालः। अत्र रूपकमर्थालंकारः। नन्वा
त्रैतात्पर्यं न तु रसादौ॥ इति महामहोपाध्यायश्रीगोविंदकृते काव्यप्रदीपे काव्यलक्षणनिर्णयः

का॰प्र॰ प्रथम उल्लासः॥ अथ काव्यलक्षणपदार्थेषु स्वरूपलक्षणादिभिर्विवेक्तव्येषु शब्दार्थयोः प्राधान्यात्प्रथमं
७ तयोः स्वरूपे निरूपयिष्यन् विभागमाह स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यंजकस्त्रिधा शास्त्रे व्यंजकः शब्दो
7 न प्रसिद्ध इत्यत उक्तमत्रेति अत्रेति काव्ये शब्दस्वरूपमप्रतिपाद्य वक्ष्यमाणत्वादर्थान् विभजते वाच्यादयस्तद
र्थाः स्युस्तात्पर्यार्थोऽपि केषुचित् वाच्यादयः वाच्यलक्ष्यव्यंग्याः। अभिमता ते वा वाचकादीनामर्थाः स्युः
केषुचिन्मतापाद्दिनयेषु न तु मीमांसकादिसम्मतेष्वपि लाघवात्पदानां पदार्थमात्रे शक्तिर्न त्वन्वयांशेऽपि
गौरवादन्यलभ्यत्वात्। तदेशो हि तात्पर्यार्थो वाच्याद्यर्थविलक्षणः शरीरस्याकांक्षायोग्यतासत्तिवशा
त्पदार्थोऽपि वाक्यार्थः प्रतीयते न चायमर्थः प्रतीत इति प्रसंगः स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वा
दित्यभिहितान्वयवादिनां मते अन्वयरूपे वाक्यार्थेऽपि पदानां शक्तिः व्यवहारेणान्वितस्यैव व्युत्पत्तिस्थापना
त् तत्रैव च शक्तिग्रहात् किंवान्वयभागस्याशक्यत्वेऽनुभवविषयत्वं न स्यात् तद्विषयत्वे शक्यत्वस्य प्र
योजकत्वात्। अशक्यस्याप्यनुभवप्रवेशे त्वतिप्रसंगादित्यन्विताभिधानवादिनां मते व्यंजकत्वं न केवलं एमः
शब्दस्य किंतु अर्थस्यापि तत्रापि नैकतरस्य किंतु सर्वस्यापीत्यभिधायादिबोधव्यवसित्वेव प्रतिपादयति सर्वेषां ७

प्रायशोऽर्थानां व्यंजकत्वमपीष्यते तत्र वाच्यस्य यथा माए घरोवअरणं अज्ज हु णत्थि त्ति साहिअं तुमए ता
भण किं करणिज्जं एमेअ ण वासरो ठाइ अत्र स्वैरविहारार्थिनी कापि नायिका वाक्यार्थेन वक्तृस्वैरविहारार्थित्वं गृहोपकरणलाहिनावा
वश्यविधेयत्वादिकं व्यज्यते लक्ष्यस्य यथा साहेन्ती सहि सुहअं खणे खणे मिम्रासि मज्झ कए सब्भावणेहकर
णिज्जसरिसं दाव विरइअं तुमए अत्राप कारिण्याः वाधावता रातेमुख्यार्थः श्लोत्रापराज्येनुन शांकं तत्
तिसम्भावस्नेहकरणीयादिसदृशमन्यिपरमरोन शत्रुत्ता वरणारूपे विरचितमिति मुख्यविपरीतलक्ष्य
नेतेन च कामुकविषयसापराधत्वप्रकाशनं व्यंग्यं व्यंग्यस्य यथा उअ णिच्चल णिप्पंदा भिसिणीपत्तम्मि
रेहइ बलाआ णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व अत्र निष्पंदत्वेन आश्वस्तत्वं
तेन विजनत्वं अतः संकेतस्थानमेतदिति कयापि चित्कंचित् संकेतस्थानाभिलाषिणं प्रति व्यजनपूर्वं प्रतिपाद्य
ते अथवा निःस्पंदत्वेन आश्वस्तत्वं तेन जनागमनाभावो तेन त्वमत्रागतः इति मिथ्या वदसीति कयापि
हृत्तसंकेता तं नागता अहत्ता गत इति वादिनं प्रति व्यज्यते एवमन्येषां विभज्य वाचकादीनां स्वरूपं क्रमेणा
ह साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः अभिधत्ते इति यातियाद्य जोस थैः अत्र मेनो न विशेषणान्तरे विप्र व्य

का॰प्रा॰ संकेतितं गृहीतसंकेतं इदंचेष्टायां साक्षादर्थप्रतिपादिकायामतिव्याप्तिवारणाय माधुर्यादिव्यंजकस्पर्शादिवर्णो
८ तिव्याप्तिवारणाय वानचसाक्षादित्यधिकपदात्मापत्रचेष्टादिविषयोपि संनादृशस्यादि व्यवहितव्यवहितसंके
8 तत्वात् नचतत्रशक्तिरेवेतिसम्यक् तद्योगिनितत्सदर्भयोगस्यस्यलक्षणायेबोधयपत्तेः नचसाक्षात्संकेतवान्त्वा
चकत्वमेतावतैवस्वस्थलेऽभिधत्तेत्यस्यैववैयर्थ्यं संयोगादिनाऽभिधायां नियमितायांवा व्यार्थव्यंजकतादृशापा
मतिव्याप्तेर्वारणीयत्वात् नचतथापिनत्रातिव्याप्तिरेवेतिवाच्यं यस्यशब्दस्यपत्राव्यवहितसंकेतग्रहोयद
र्थस्य इउयमुच्यते तत्रसतदर्थवाचकइतिहिलक्षणार्थः अथसंकेतग्रहस्यशब्दासहकारितायां किंमा
नुमितिचेत् अगृहीतसंकेतस्यशब्दादर्थप्रत्ययाभावः इदंचपत्राव्यवधानेनसंकेतोग्रहस्तद्रूमादिह
त्रिदर्शनात् संकेतविशेषणतयासाक्षात्पदंव्याख्यायमेवत्क्लनत्वसंयोगादिनाऽभिधायां नियमितायांव
त्रशक्यानरथ्वंनतत्रवाचकत्वमाप्रसाक्षादित्यभिधानक्रियाविशेषणत्वादिति तत्रतुवाक्यार्थप्रती
तिव्यवधानेनतत्प्रतीतिरित्यप्रसंगः नचसंकेतितपदवेप्यार्थ्यालक्ष्यप्रतीतावपिवाच्यप्रतीतिव्यवधा रामः
नाभावान्माधुर्यादिवर्णानामासादेवमाधुर्यव्यंजकत्वाद्वभास्कर स्क तत्स्पप्याप्यन्विताभिधाननये संकेतित ८

त्वान्नात्रातिव्याप्तिवारणाय साक्षादिति विशेषणं तदनभ्युपगमे तु साक्षादभिधत्ते संकेतितमभिधत्ते इति लक्षणं
यं न बाधस्य चेष्टायामतिव्याप्तिः शक्तत्वस्य प्रकरणादेरिति विशेषणं तदनभ्युपगमे तु साक्षादभिधत्ते संकेतित
मभिधत्ते इति लक्षणं यन्न बाधस्य चेष्टायामतिव्याप्तिः शक्तत्वस्य प्रकरणादेवलाभादित्याह ननु साक्षात्संके
तो गृह्यत इत्यादिदृष्टान्तो साक्षात्वस्य संकेतविशेषणत्वव्याख्यानेन विरोधाद्युपेक्षणीयं किंच प्रथमे माधुर्यादि
व्यंजकस्य शोदिवर्णेष्वतिव्याप्तिः तेषां साक्षादेवाङ्गात्मादिव्यंजकत्वात् द्वितीये तु वाच्यस्यैव व्यापकतादशायां
अतिव्याप्तं न च तत्रैव शाब्दिकैः संकेतवान्वाचकः तस्यैतत्तदा सम्बन्धत्वेन शेषवैयर्थ्यात् संकेतितश्च तु भेदो
जात्यादिर्जातिरेव वा न च यं विभागो नुपपन्नः जात्यादेरसंकेतितत्वात् स्वाध्यसंकेतग्रहस्य व्यवहारमात्राधीन
तया प्रवृत्तिनिवृत्तियोग्यव्यक्तावेव तदोचितत्वादिति मैवं किं हि व्यक्तिषु सर्वासु संकेतग्रहो व्यवहारं
गृहीतपस्याकस्माचित् नाद्यः आनन्त्यात् नान्त्यो व्यभिचारप्रसंगात् यतोऽगृहीतसंकेतगोपिण्डद्वयघटादे
रपि गोपदात्प्रतीतिः प्रसक्ता अगृहीतसंकेतत्वस्य तुल्यत्वात् किंच न यत्र संकेतग्रहस्तस्यापि प्रतीति

का॰प्र॰ रितिव्यभिचारात्तत्र्यक्तौ संकेतः अपि च व्यक्तिसंकेतपक्षे गोः शुक्लश्चलो डित्थ इत्यद्‌मादिशब्दानामर्थभेदो न
८ प्राप्नोति किमेवमनिष्टमिति चेत् सहप्रयोगानुपपत्तिः तस्मादुपाधावेव संकेतः स च द्विविधः स्वभावको व
१ स्कष्टत्रिर्वदत्वादिः वक्तृपदच्छयासंनिवेशितो नामरूपः तत्राद्यो द्विविधः सिद्धः साध्यश्चेति सिद्धोऽपि द्विधा
पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च प्राणप्रदत्वं च पावस्थितिसंबंधित्वं यद्यपि प्रयुक्तत्वादेर्नित्यत्वा
भ्युपगमे गोत्वादिना समकालमेवं संबंधित्वं तथापि तस्य संबंधः कदाचिदपेत्यपि न तु गोत्वादेरिति शेषः
तत्र प्राणप्रदो जातिः उक्तं हि वाक्यपदीयेन हि गोः स्वरूपेण गौः नाप्यगौः गोत्वाभिसंबंधात्तु गौरिति अस्या
र्थः गौः स्वरूपेण न गोव्यवहारस्य नाप्यगोव्यवहारस्य विषयः गोत्वाभिसंबंधात्तु गोव्यवहारस्य विषय इति
तथा च प्राणप्रदत्वमस्य सिद्धमिति विशेषाधानहेतुस्तु गुणः गोत्वादिना लब्धसत्ताकं हि वस्तु शुक्लत्वा
दिना विशिष्यते साध्यस्तु पूर्वापरीभूतैकदेशत्वेन विवक्षितः क्रियारूपः छेदनादिः यदुक्तं पावत्सिद्धम रामः
मसिद्धं वा साध्यत्वेन प्रतीयते आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते इति वक्तृपदच्छासंनिवेशितस्तु ८

शब्दरूपः डित्थादिशब्दानां प्रथममवर्णप्रतीत्या किंचित्प्रकाशितमंत्यवर्णबुध्या निःशेषतो ग्राह्यं नानावर्णात्मकघटा
दिपदवद्वर्णक्रममप्यस्फोटाख्यं शब्दस्वरूपं डित्थादिष्वर्थे बुद्ध्युपाधित्वेन वक्त्रा यदृच्छया कल्प्यत इति संज्ञारूपोपद
ष्टात्मको डित्थादिशब्दाः चंडीदासमतेऽप्यस्वलक्षणं बुध्या निःशेषतो ग्राह्यं यस्य तज्जातिमतीत्यनंतरं व्यक्तिप्र
तीतिरिति क्रममप्यत्र चरित्थादीनां शब्दानां स्वरूपं डित्थादिष्वर्थेषूपाधित्वेन पदार्थोपयोगि समनुकूलतया संके
त्यते उपाध्यंतरं तेषां नास्ति किंतु धर्मिमात्रं ततः प्रतीयत इति एतमर्थमाह नवमाध्यविरुद्धं तत्र शब्दस्यैवोपाधित्वेन व्य
वस्थापनात् डित्थादिशब्दात् डित्थादिनामायमिति प्रतीतेः एवं हि गोः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दा
नां प्रवृत्तिरिति भाष्यकारः नं चैवं परमाण्वादिशब्दानां जातिशब्दत्वं स्यात् न गुणशब्दत्वे परमाणुत्वादीनां
गुणप्रदत्वेन जातिचेत्यत्यजातिशब्दा एव ते वैशेषिकनयानुसारेण गुणत्वे शब्दत्वमवहारः न नु पयादि
निष्ठानां शुक्लादिगुणानां गुडतंडुलादिनिष्ठानां पाकादिक्रियाणां च भेदस्य प्रसक्तत्वात् सिद्धो व्यक्तिसंकेतप
क्षोक्तदोषः समान इति चेत्र गुणादीनां स्वरूपत एकरूपाणामाश्रयभेदाद्भेद इव दृश्यते यथा एकस्यैवपा
काद्युक्तं रूपं नष्टं श्यामं मन्यते च मिति प्रतीतेः न चैवं भ्रांतिर्बोधकाभावात् न चोत्सारः विना श्रो समवाय

का॰प्र॰ स्यप्रतीयेतेत्युक्तं तदनुपपन्नत्वात् तथाचानुगतप्रत्ययानुरोधेन तत्रापि शुक्लत्वादिजातिःसाध्यवाच्यमतेत्वे
५ वसंकेतस्तु पेयं एवं गुडतण्डुलपाकादिष्वपि पाकत्वादिकं तथा तारत्वादि विरुद्धधर्माध्यासाद्भिन्नेषु डित्थ
10 त्वादिकं जातिःसैव बद्धित्थादिपदशक्या एकत्वादिसंगीकर्तव्यं एतेन बालवृद्धशुकाद्युदीरितेषु डित्थादि
शब्देषु च प्रतिसरं भिद्यमानेऽपि डित्थार्थे वा डित्थादित्वमस्तीति व्याख्यातं एवार्थेन वा शब्देन च शब्दस्य
स्थानविनिपातात् यद्वा सर्वेष्वेव वाच्येषु सामान्यमस्तीत्यत्र तद्व्याकरणात्पर्यं अथवा भाष्यकारमतेडि
त्थादिशब्द एवोपाधिरिति तन्मतेपि शब्दस्य नानात्वात्तन्निष्ठा जातिरेव प्राक्स्वांगीकार्या इति तत्रापि
पं तस्मात् सर्वशब्दानां जातिरेव संकेतविषय इत्याहुः येषांमते संज्ञाशब्दानां शब्दो नोपाधिः किंतु तत्तो
धर्मिमात्रं प्रतीति तेषां मते आकाशादिशब्दानां कथं जातौ संकेत इति विसंनेत्यापिकादपस्कनव्य
क्तिमात्रं शक्यं न वा जातिमात्रं आद्ये आनंत्यव्यभिचारात् अन्त्ये व्यक्तिप्रतीत्यभावप्रसंगात् न चाक्षे
पाद्व्यक्तिप्रतीतिः तस्माद्विशिष्ट एव संकेतः न चानेसादृशक्यता व्यभिचारो वा गोत्वादिसामान्यलक्ष ए म:
णया सर्वव्यक्तीनामुपस्थितेः तो सर्वत्र संकेतग्रहसौकर्यादित्याहु ति ष्टते सोगतनास्क अपोहत्वादिसा १०

मानत्वेदात्तयासर्वेषां तीनामनुगमस्थितौ तैः सर्वत्र संकेतग्रहः सौकर्यादिसाति हंते सौगतास्तु व्यक्त्यावानं
त्यादिदोषाभावस्य च देशकालानुगमाभावात्तद्गतापामतं घायन्तो संकेत इत्यादिमतानि प्रकृतानुपयो
गान्नसूत्रकृता नदर्शितानि ननु वाच्यत्वस्य व्यंग्याः पदार्था इति विभागोऽनुपपन्नः मुख्यत्वेन प्रसिद्धस्य तुरी
यस्याविभावादित्यत आह समुख्योऽर्थः साक्षात्संकेतित एवार्थो मुख्यत्वेन प्रसिद्ध इत्यर्थः नपपन्नः मुख्य
त्वेन प्रसिद्धस्य तुरीयस्याविभावादित्यत आह समुख्योऽर्थः साक्षात्संकेतित एवार्थो मुख्यत्वेन प्रसिद्ध इ
त्यर्थः कुतस्तत्र थेमत आह तत्र मुख्यो व्यापारोऽस्याभिधोच्यते अस्य शब्दस्य तत्वार्थे योऽभिधारूपो व्या
पारः समुख्यो यत उच्यत इत्यर्थः पद्यान्यभिधाव्यवहारस्य गानिधासमयाभावादिसादोदर्शनात्ता
त्स्वपतितात्तत्रमुख्यइत्यादि तत्र यो व्यापारः सोऽभिधेयुच्यत इत्यर्थः मुख्यत्वोत्कीर्तनं च वक्ष्यमाणलक्ष
णापास्त्वहाधगुणः सत्वस्योपपत्तये पत्तुमुख्यार्थबाधेतद्योग इत्यादिकारिकोपयुक्त तयावाच्यस्य
संक्षांतरं करोतीति समुख्य इत्यादीति सूत्रावतारणं तदप्युक्तं वाच्यार्थबाधे तद्योग इत्येवमेव तत्रापय
त्नो संक्रांतरकरणस्य गौरवेणानौचित्यात् वाचकं रोनि समुख्य इत्यादीति सूत्रावतारणं तदयुक्तं:

॥

वाच्यार्थबाधे तद्योगे इत्येवमेवतत्रोपयन्तोसंज्ञान्तरकरणस्य गौरवेणानौचित्यात्वाचकं निरूप्यता लक्षणि
केलक्षयितुं लक्षणां लक्षयति मुख्यार्थबाधेतद्योगे रूढितोऽथप्रयोजनात् अन्योऽर्थोलक्ष्यते यत्सा लक्ष
णारोपिताक्रियारूढिः प्रसिद्धिः प्रयोजनं व्यंग्यार्थप्रतिपादनरूप क्रिया व्यापारः अ अन्योर्थोपद्धस्य
नेसालक्षणेतिलक्षणालक्ष्यतेप्रतिपाद्यत इत्यर्थः तेनात्माश्रयः मुख्यार्थबाधः शक्यसंबंधो रूढि
प्रयोजनान्यतरद्वेतिहेतुत्रयवचनं व्यंजनायां शक्तिस्मृतौ चातिवारणाय तद्योग इति लक्षणेपि अवश्य
नीयं योगस्य च हेतुत्वं विवक्षितमतो न मुख्यार्थसंबंधिव्यंजनायामव्याप्तिः मुख्यस्यार्थस्याभि
धाहृपमुख्यार्थसंबंधेन प्रतिपादनं संभवतीति तद्धारणायान्य इत्युक्तं अन्योऽमुख्यः पदितिरु
रातिकृतलक्षणक्रियामात्रपरामर्शः तेन शक्यसंबंधेनाशक्यप्रतिपत्तिर्लक्षणेति प्राचीनमतेनै
तल्लक्षणं तद्धेतुः शक्यसंबंधो लक्षणेति परमार्थः प्रतिपत्तिहेतुर्हि हत्तिर्नतु प्रतिपत्तिरेव पत्तु पदि लक्ष
पत्त इत्यर्थकतयासंबंधपरतयैव सूत्रव्याख्यानं तदयुक्तं नाभिधासमयाभावाद्व्लक्षणावत्र लक्षणा एभः
इत्यत्र मुख्यार्थबाधादित्रयं हेतुः इति व्याख्यानविरोधात् नहि संबंधरूपत्वे लक्षणायाः संबंधो हेतुर्घटते २१

न तु प्रतिपादनं चेत्स्वरूपस्य लक्षणा न तर्हि शब्दधर्मः गंगादिशब्दानां नीरादिकमुपस्थाप्य विरामे नीरार्थेनैव संबंधेन तीर
घर्थप्रतिपादनाद्वृस्वस्य पदेन संबंधविरहाद्वेसतन्नाह आरोपितक्रियेति शक्यव्यवहितलक्ष्यार्थविष
लाधुवेऽत्रारोपितएव समवायार्थः वस्तुतोऽर्थनिष्ठ एवेत्यर्थः तदेतदुक्तं स्वातएऽर्थनिष्ठ इति सहितो यथा कर्म
णि कुशल इत्यादौ अत्र दर्भग्रहणयोग्यत्वान्मुख्यार्थबाधः विवेचकत्वं च संबंधः एवमन्यत्राप्यूह्यं तयाने
ऽगारिजनपदशशब्दजने लक्षणा शक्तंसगि द्विये प्रयोजनाभावा यथा गंगायां घोष इत्यादौ अत्र हि गंगातीरे घोष
इति मुख्यशब्दात्तादृशं पावनत्वं न प्रतीयते यादृशं गंगायां घोष इति लाक्षणिकात् उक्तस्य तावत् द्वि
विधा शुद्धा गौणी च तत्राद्या द्विविधा उपादानलक्षणा लक्षणलक्षणा च तेऽपि प्रत्येकं सारोपा साध्य
वसाना चेति हि विधा इति शुद्धाभेदाश्चत्वारः गौणी तु द्वेधा सारोपा साध्यवसाना चेति षड्विधत्वं लक्षणायाः
कारिकात्रयेण प्रतिपादयति। स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं उपादानं लक्षणं चेत्युक्ता शुद्धैव सा
द्विधा स्वसिद्धये स्वार्थस्यान्वयप्रवेशसिद्धये पराक्षेपः परलक्षणा स्वार्थापरित्यागेन परार्थलक्षणमुपा
दानमित्यर्थः। अतः काकेभ्यो दधि रक्ष्यतामित्यस्य न तृतीयभेदत्वं एवं परार्थं स्वसमर्पणं परस्यान्वयप्रवे
शसिद्ध्यर्थं स्वसमर्पणं स्वार्थसमर्पणं तान्त्रतस्यार्थपरित्यागः स्वार्थपरित्यागेन परार्थलक्षणं लक्षणेत्यर्थः

का.प्र. एताभ्यामुपाधिभ्यां शुद्धैव द्विविधा उक्ता न तु गौणापीत्यर्थः॥ एते एवाजहत्स्वार्थाजहत्स्वार्थे इति उच्येते. ननु शुद्धे
१२ वेयमनुपपन्नः गौणोपाधावपि तयोः संभवात् तथाहि गौर्वाहीक इत्यादौ लक्षणलक्षणता स्फुटैव उपादानल
12 क्षणा तु गौर्वाहीको भवविषये गाव एते समानीयन्तामित्यादाविति चेत्. मैवं अत्रोपचारबीजसंबंधः सादृश्य
मन्यो वा. आद्ये शक्यसादृश्यस्य शक्यान्वितपाकथं शक्यस्याविलक्ष्यता. येनोपादानलक्षणता स्यात्.
अन्त्ये कथं गौणीति सादृश्यसंबंधमपुरस्कृत्य लक्षणाया एव गौणीत्वानतत्रोपादानलक्षणापयोक्ताः प्रवि
शंतिपष्टीः प्रवेशयेत्यादौ अत्रोक्ततादर्थ्यः स्वतोऽसंभवत्यवेशास्तत्सिद्धये स्वसंयोगिपुरुषान्लक्षयन्ति।
यथा वकाकेभ्यो दधिरक्ष्यतामित्यादि सग्रहणयोक्तः अन्येपुनर्जातिपदार्थवादिनउपादानलक्षणाम
न्यामुदाहरन्ति. यथा गोरनुबन्ध्य इत्यत्राप्रतिपादितमनुबन्धनं गोपदार्थस्य तात्पर्यमतः कथं स्यादिति जामा
अवच्छेदकतयाकथंचित्तत्वान्वयसिद्धये व्यक्तिर्लक्ष्यते. ननु व्यक्तिरभिधेयैव न तु लक्ष्येति चेत् न प्रकोके
वलायामेवाभिधा जातिविशिष्टायां वा. आद्ये आनन्त्यव्यभिचाराभ्यां संनागृहीतविशेषणायामपेन जा
तावेवाभिधा व्यक्तिप्रतीतेरन्यथाप्यसंभवात्. तदुक्तं विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति रामः
तदेतदयुक्तं. प्रयोजनस्य हेतोर्वानतीयस्य लक्षणाहेतोरभावात् नातिव्यक्तिपदार्थो सामान्येन हि लोकप्रसि १२

द्विमाश्रित्यस्पष्टिविचारः कथं तर्हि मद्गमेन व्यक्तिप्रतीतिः जात्याक्षेपात् व्यक्तिं विना तस्या अभावात् । यथाक्षिप्तता
मित्यत्राक्षिप्यपाकर्तुः कुर्वित्यत्र कर्मणः अपरे तु पीनो देवदत्तो दिवा न भुंक्ते इति वाक्यमभोजी पीन इति वत् पीनत्वान्य
पप्रयोजकस्य भोजित्वस्याप्रतीत्यायोग्यतामनुभमानं वाक्यं परं बोधयति । तेन तत्सिद्धये रात्रिभोजनलक्षणा तेन
याच दिवा न भुंक्ते इति मुख्यमर्थं सादापेव तल्लक्षणेन रात्रौ तु पादाने लक्ष्ये लक्षणोपमित्याहुः तदप्यसम्यक् शब्दाध्या
हारेणैवेश्रुतार्थोपपत्तेरर्थाध्याहारेणापेक्ष्यार्थोपपत्तेरेव रात्रिभोजनप्रसपेलक्षणानङ्गीकारात् लक्षणालक्षणा
तु गंगायां घोष इत्यादौ । अत्र तटादेर्घोषाधिकरणत्वसिद्धये गंगादिशब्दः स्वार्थमर्पयति । स्वार्थपरित्यज्यत
नैव वर्तते उभयरूपा चेयं उदाहृता शुद्धा । न तु गौणी । उपचारमिश्रा हि गौणीत्युच्यते उपचारश्च सादृश्यसं
बंधेन प्रवृत्तिः सादृश्यातिशयमहिम्ना भिन्नयोर्भेदप्रतीतिस्थगनं वा । न चोक्तं पोस्तत्संभवः । केचित्तु नरा च स
ते उपचारमिश्रत्वेन शुद्धायामिश्राता भेदकं किंतु तटस्थत्वं । तेन लक्ष्यकुप्यमुख्यार्थस्य लक्ष्यस्य तु अभे
दप्रतीतिः । तथा हि गौर्वाहीक इति गोत्वमिश्रादौ भेदेऽपि शक्यलक्ष्ययोरभेदः प्रतीयते । न तु गंगायां घोष इत्या
दौ तत्र भेदमात्रप्रतीतेरिति । अस्मिंस्तु गंगायां घोषः प्रत्ययः प्रवेशयेत्यनयोरेव परस्परमेदहेतुस्तटस्थत्वं गंगायां

का.प्र. मिमत्रतत्त्सत्वान्. पष्ठीरित्यत्रतदभावादितिमन्यते. तदुभयमप्यसत्. अस्तिहिगंगादिपदेस्लीगृदिप्रतिपादने
१३ गंगादिनिष्टपावनत्वादिरूपप्रतिपिपादयिषितप्रसरपः तत्रगंगात्वादिप्रतीतिरेवबीजं. ननुतीरत्वादिप्रती
13 तीतिरेव. तीरेघोषइत्यप्रज्ञापितत्वप्रतीतिप्रसंगात्. अथगंगाशब्देनतटप्रतिपादनेगंगासंबंधस्तत्रप्रतीयते. तदेवच
तद्बीजमितिचेन्न. एवंहिगंगातटेघोषइतिमुख्यशब्दप्रयोगेपितत्प्रतीतिःस्यात् नचसंबंधप्रतीतौविशेषाभा
वात्. अथबाधेजागरूकेकथंगंगाशब्दादिभिर्गंगात्वादिकंतीरेबोध्यतइतिचेत्. उच्यते. शब्देनलक्ष्यार्थंप्रति
पादितेतत्रमुख्याभेदोव्यंजनयाप्रतिपाद्यते तदेतदुक्तं. तटादौनोगंगादिशब्दैःप्रतिपादनेतत्वप्रतीतो
प्रतिपिपादयिषितप्रयोजनसंप्रत्ययइति अत्रप्रतिपादनेइतिसतिसप्तम्यौपमत्यपस्थानेतेयेबोध्य
तेनचव्यंजनेबाधःप्रतिबंधकइतिकाव्यविदांपंथाःवक्ष्यतिहि सारोपसाध्यवसानयोगौणाभेदयो
र्भेदेप्यभेदावगमःसर्वथैवाभेदप्रतीतिश्चफलमिति। किंबहुनाबाधितएवयावनत्वादिविशेषस्त
टादौप्रतीयतः पत्सत्त्वपिष्यति:योगःफलेननोइति. नन्वेवंकथंगौणापामेवाभेदत्स्यप्रयंप्रयोजनं एमः
वक्ष्यति. शुद्धभेदयोस्तुप्रयोजनांतरमितिचेतन. गौणपातन्मात्रस्यप्रयोजनत्वात्. शुद्धभेदयोस्तु १३

मुरोपाऽस्यात्। पञ्चोक्तौ विषयी विषयस्तथा। अन्या। अर्थात् गौणी आरोपाध्यवसानाभ्यां भिद्येते। न तूपादानलक्ष
णाभ्यामिति तु शब्दार्थः। विषयी आरोप्यमाणो गवादिः। विषय आरोपस्य वाहीकादिरूपः। तत्र यथा अनपह्नु
तभेदोसामानाधिकरण्येनोक्तौ शब्दप्रतिपाद्यो मालक्षणामारोपा। विषयविषयिणोर्भेदेनोपन्यास
स्यात्रारोपपदार्थत्वात्। विषय्यन्तःकृतेऽन्यस्मिन्सास्यात्साध्यवसानिका। विषयिणा आरोप्यमाणेन अन
स्मिन्नारोपविषये अन्तःकृते निगीर्णे भेदेनानुपस्थित इति यावत् विषयिमात्रेण निर्दिश्यते न तु विषयोऽपि।
साध्यवसानापि ष विषयपतिरोभावस्यात्राध्यवसानपदार्थत्वात्। एतो भेदौ रूढावभेदेपि भवत इति प्रतिपा
दुपन्नेव शुद्धायामोपपत्रलक्षणामाह। भेदाविमौ च सादृश्यात्संबंधान्तरतस्तथा गौणौ शुद्धौ च विज्ञेयौ। इमौ आ
रोपाध्यवसानरूपौ भेदौ यदि सादृश्यसंबंधान्यदा गौणौ। अथ संबंधान्तरान्तदा शुद्धौ। तत्र सादृश्याद्यथा गौर्वाही
क इति सारोपः। गौरयमिति साध्यवसानः। यद्यपि वाहीकस्य गोसदृशत्वेन नगोतया वाऽवस्थितौ सारोपत्वमेवो
चितं। तथापीदृशस्यारोप्यविशेषणतया नतूदाहरणान्तरम्। अतएव न्यस्ते अनिश्चयरूपसंकर एव सरे न
यनानंददायी त्रो विम्बमेतत्प्रसीदति इत्यत्र एतदिति विवविशेषणतया किमियमतिशयोक्तिः। किं वा एतादि ति विवक्ष

का·प्र· निर्दिष्टस्य विंबमिसारोपाद्रूपकमिति· अत्र केचित्· गोशब्दस्य मुख्यतो गोत्वं प्रवृत्तिनिमित्तं· लक्षणया तु गोशब्दार्थग
२४ तजाड्यमान्द्यादितया लक्षणातीति गोशब्देन जडत्वेन रूपेण वाहीक उच्यते· तदुक्तं। अशक्यस्याशक्यवृत्तेः स्वधर्मस्या
14 प्रवृत्तिनिमित्तत्वात्· शक्यत्वे शक्यवृत्तित्वे स्वभिन्नशक्यानधिकरणत्वस्य तत्त्वात्· अपरे तु· नगवादिशब्देन
वाहीकादिः प्रतिपाद्यते· किंतु गवादिगतस्य जाड्यादिगुणस्याभिन्नतया वाहीकादिगतजाड्यादयो लक्ष्य
न्ते इत्याहुः। तदप्यसम्यक्· गौर्वाहिक इत्यादि सामानाधिकरण्यानुपपत्तेः· इदं पुनरत्र तत्त्वं साधारणजा
ड्यमांद्यादि लक्ष्यतावच्छेदकमाश्रित्य वाहीकादिर्लक्ष्यत इति· तेन जडो वाहीक इत्यादि शक्यार्थोऽभवति· तदुक्त
मस्मत्तैः· अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते· लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति लक्ष्यमाणगुणो
रितिलक्ष्यमाणगुणेषु गोजाड्यादपरस्यैरेव परिपोषणाः शक्यसंबंधस्तदा गोणी वृत्तिरिति· अविनाभावश्चा
त्र संबंधमात्रमभिमतं न तु व्याप्तिः। मंचाः क्रोशंतीत्यादावभावात्· दशविशेषविशिष्टस्य तत्रापि सास्त्ये
वेति वेत्· नहि आक्षेपादेव व्यापकप्रतीतिरस्तु किं लक्षणयेत्युक्तत्वं· गोत्वं वधवदस्य तत्र· संबंधान्तरात्सा एम:
रोपोपन्या· आयुर्घृतमिति· साध्यवसानोपथा· आयुरेवेदमिति· एवमादौ सादृश्यादन्यो पः कार्यकार २५

ण्याभावादिः संबन्धस्तत्पूर्वकस्त्वारोपाध्यवसाने। अत्र गौणाभेदे सारोपे भेदेपि ताद्रूप्यप्रतीतिः साध्यवसाने तु सर्वथै
वाभेदावगमः। प्रयोजनं च सुखमिदे सारोपे आयुर्घृतमित्यत्र वैलक्षण्येनाकार्यकारित्वादिः साध्यवसाने त्वव्यभिचारेण कार्यकारि
त्वादेः प्रतीतिः प्रतीतिः फलम्। तदुक्तं सपंचासेदप्रतीतिपूर्वकमित्युक्तम्। क्वचित्तादर्थ्यादुपचारः। यथा इ
न्द्रार्था स्थूणा इन्द्रः। क्वचित्स्वस्वामिभावात् यथा राजकीयः पुरुषो राजा। क्वचिदवयवावयविभावात् यथा
करमेधारयेदग्रहस्तइत्यामवयवे। अग्रमात्रे हस्तोपचारः क्वचित्ताद्दीपकर्मेशालिलात्। यथा अतक्षा तक्षा
लक्षणा तेन षड्विधा। उपादानलक्षणानूपस्फुरल्लेदाभ्यां सह गूढप्रयोजनाभ्यां भेदसंभवत्वपि न ते विज्ञा
नकत्वेनोक्ताः किन्तु हेतुत्वेनेति न तत्कृतो भेदो गणितः। अत एव पश्चाद्व्यङ्ग्येन रहितेत्यादिना तत्कृतं भेदं द
र्शयिष्यतिः अन्यथा पुनरुक्तिप्रसङ्गात्। एवं च यथोक्तव्याख्यानेन षड्विधत्वे निर्दिष्टे यत्षड्विधेति गूढप्रयोजने
नोपादानलक्षणारोपाध्यवसानरूपैः षड्भिरुपाधिभिः कल्पिता विधाः प्रकारा यस्या इति षड्विधेति व्याख्या
तास व्याख्यानं तत्र शुद्धैव साद्विधा सारोपान्यापि चेति। एवं तु शब्दयोरालोचनविजृम्भितत्वात् अनादेयम् एव
मोणयादिकृतं प्रकरणबद्धं प्रतियाद्यव्यंजनकृतं प्रकारत्रयमाह। व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने। तद्

का॰प्र॰ ऽस्यानुवर्त्तते। ननु प्रयोजनस्य लक्ष्यत्वं व्यंग्यत्वं सा हि नियमः इति चेत्। प्रयोजनस्य व्यंजनमात्रगम्यत्वात् तदिदं उक्तं
१५ प्रयोजनेन सहितं व्यंजनव्यापारगम्यमेवेति। यत्तु ननु लक्ष्यप्रयोजनयोर्द्वयोरपि लक्षणायैव प्रतीतौ किमत्र व्यंजनेन
15 येत्युक्त आह। प्रयोजनहीनेति। तस्य लक्षिकावतारणे तदज्ञानविजृंभितम्। अत्र व्यंजनस्थापनस्याप्रस्तुत
त्वात्। तत्प्रकरणे वक्ष्यमाणनान्यापरागरूपेणेति मूलेऽनवप्रतिपादनात्। तत्र गूढमगूढं वा। न हि नियमः लक्षणाभे
दप्रयोजनस्यारोपादिर्येषामभिधानेन तथात्वप्रयोजकेनरूपमपीति वस्त्वार्थः। वाशब्दः समुच्चये। काव्यभावना
परिपक्वबुद्धिः सहृदयः तन्मात्रवेद्यं गूढं। तदितरवेद्यं अगूढं। तत्र गूढं यथा। मुखं विकाशितस्मितं वशितवा
क्रप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः। उरोमुकुलितस्तनं जघनमंसबन्धोद्धुरं बतेन्दुवद
नातनौ तरुणिमोद्गमो मोदते। अत्र विकाशः पुष्पधर्मः स्मितेऽनुपपन्न इति प्रसरत्वं लक्ष्यते ना विकसितपदे
न लक्षितेन रमणीयतातिशयो व्यज्यते स च गूढः। एवं वाहितेन समुच्छलितापास्तसंस्थामुकुलितोद्धुरमोद
तेशब्दैः। आयतत्वोल्लसितानेकविषयसंचारित्वविच्छिन्नत्वयोगपत्वानि नियंत्रितत्वानिलक्ष्यपरिसरेषु कान्त रामः
राजित्वसकलत्वश्रीकारित्वानुरागातिशयपालिंगनयोग्यत्वरमणीयत्वस्पृहणीयत्वानिगूढपानिव्यज्यन्ते य १५

पादा॰ मम चकोरी यातिसंमालिनयति दृग्भंगिमहिमा हिमांशोर्नेदं नैकवलयति वक्त्रं मृगदृशः॥ तमो वै दाध्यानिस्य
गयति कचः किं चवचने कूहूकंरीकंठध्वनि मधुरमाण्ॅतिरयति॰ अत्र क्रियापदानां आम्नातिकविद्यायत्वाद्द्वि
ग्धानिगूढानिगूढानि॰ अगूढं यथा॰ श्रीपरिचयाज्जगाम अपि जवन्त्यतिज्ञाविदग्धचरितानां आत्मनिकविद्यापवा
द्विदग्धानिगूढानिगूढानि॰ अगूढं यथा॰ आपरिचयाज्जगुरा[illegible]वन्तितामविदग्धचरितानाम्॰ उपदिशन्तिका
मिनीनां यौवनमद एव ललितानि॰ अगूढं यथा॰ श्रीपरिचयाज्जगत् अपि लवन्नमति स्याविदग्धचरितानाम्॰
उपदिशन्ति कामिनीनां यौवनमद एव ललितानि॰ अत्रोपदेशकत्वं शब्दविशेषप्रयोक्तृत्वमदे अनुपपन्नमि
त्याविष्कारे लक्ष्यता उपदिशन्तिपदेन अनायासेन शिक्षादानं अभिव्यज्यते॰ तवसत्त्वदयासत्त्वदयोरुभयो
रप्यभिधेयवस्तुप्रकाशते॰ तदेषा कल्पिता त्रिधा॰ तत्रस्मात् त्रिधा अगम्या गूढगम्या अगूढगम्या चेति॰ एवं
लक्षणां निरूप्य तया लाक्षणिकं लक्ष्यपति॰ तमूर्ध्वोद्धृतिकः स्याद्वाचको लाक्षणिकः इति सूत्रस्य शब्दस्म
नुपज्यते॰ तमूर्ध्वः तस्मात्स्वरागायास्माप्नपः॥ अथ व्यंजकशब्दलक्षणाय व्यंजनां निरूपयति या॰ सा च द्वेधा॰
शब्दनिष्ठा अर्थनिष्ठा च॰ तत्रान्या शब्दलक्ष्योऽनुपपन्ने सर्वे विवेच प्रथमां निरूपयितुमुचिना तथा

का प्र· पि सुप्रसिद्धत्वाल्लक्षणायाः प्रकृतत्वाच्चगन्म· तामेतत्वप्रथमं निरूपयति· तत्र व्यापारो व्यंजनात्मकः तत्र लाक्षणिकश
१६ ब्दे व्यापारो व्यंग्यप्रकाशानुकूलः । लक्षणादिनैव तत्प्रतीतेः किं तयेत्यत आह· यस्य प्रतीतिमाधातुं लक्षणा समुपा
16 स्यते· फले शब्दैकगम्येऽत्र व्यंजनान्नापराक्रिया· यस्य पावनत्वादेः फलस्य प्रतीये लक्षणाश्रयः शब्दप्रयोगः तत्फ
ले तस्मादेव शब्दाद्गम्ये तेन तु प्रमाणान्तरात्· व्याप्तिस्मृत्यादेरनपेक्षणात्· न च तत्र शब्दस्य व्यंजनं विनान्यस्याः क्रि
याया व्यापारः तथा हि· नाभिधा समयाभावात्· पावनत्वादौ फले संकेतग्रहाभावात्· अभिधा हि संकेतग्रहसहायैवो
पयुज्यते· न सत्वरूपसन्नीवस्तते· । हेत्वभावान्न लक्षणा· । मुख्यार्थबाधस्तद्योगो रूढिप्रयोजनान्यतरदिति त्रयं ल
क्षणाहेतुस्तदभावमेवोपपादयति· लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो· न प्रयोजनमेतस्मिन्न
च शब्दः स्खलद्गतिः यथा गंगाशब्दस्य तीरं मुख्योऽर्थः नात्र च बाधः तीरेण तत्संबंधः । तीरस्य च लक्षणायोप
स्थापने मुख्यशब्देन प्रतिपादयितुमशक्यस्य पावनत्वादेः प्रतीतिः प्रयोजनमिति गंगाशब्देन तटं लक्ष्य ताम:
ते· तद्वद्यदि तटमप्यमुख्यं स्यात्तत्र च बाधो भवेत् प्रयोजनस्य च गंगादिगतपावनत्वादिविशेषस्य तटेन सं १६
बंधः स्यात्· लक्षणाया प्रयोजनप्रतिपादनस्य च प्रयोजनान्तरं संभवेत्· तदा गंगाशब्दः प्रयोजनं लक्षयेत्· न

वैतदेकमप्यन्वेतस्यार्थः ॥ न केवलं मुख्यार्थबाधादीनामभावमात्रम्· किंतु तेषामपेन्तापि नेत्याह· न च शब्दः स्खल
द्गतिरिति· मुख्यार्थबाधादित्रयमपेक्ष्य बोधकत्वं स्खलद्गतित्वं। एवमपि गंगाशब्दस्तटमिव प्रयोजनं प्रति
पादयितुमसमर्थ इत्यादिदृष्टान्तो बाधादिकमनपेक्ष्येति शेषोऽत्र द्रष्टव्यः ॥ समर्थ इति पाठे तु बाधादित्रयमपेक्ष्ये
वेति शेषः· ननु तर्हि प्रयोजने लक्ष्ये प्रयोजनान्तरमिति वैयाकाङ्क्षादित्रयाभावमत्राह· एवमप्यनवस्था स्याद्या मू
लक्षयकारिणी· मूलं प्रकृतार्थप्रतीतिः ॥ ननु पावनत्वादिविशिष्टमेव तीरं लक्ष्यतामिति किं व्यंजनया· न चैवं
प्रयोजनस्यापि लक्ष्ये को दोषः प्रत्युत शाब्दत्वं तरां प्रयोजनं नास्तीति वाच्यम्· गंगातटे घोष इत्यतोऽधिकस्यार्थस्य
पावनत्वादिविशिष्टस्य प्रतीतेनैव प्रयोजनत्वादित्यत आह प्रयोजनेन सहितं लक्षणीयं न युज्यते कुत इत्याकां
क्षायामाह· ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्· ननु विषयफलयोर्भेद इति सूत्रार्थः स चायुक्तः ॥ फ
लत्वं हि जन्यत्वं जन्यप्रतीतिविषयत्वं वा· आद्ये पावनत्वादौ तदभावः तस्मान्न विषयाद्भेद एव· अन्त्यपक्षस्ता
दे नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वेति व्यक्तिविरोधः ॥ प्रकटता ज्ञानस्य प्रत्यक्षजन्यत्वाभावात्· न च
जन्यज्ञाप्यसाधारणे के साध्यत्वमस्तीति· अत्र ब्रूमः ॥ ज्ञानस्य जनकीभूतो विषयो यथा ज्ञानादन्यः तथा फ

का॰प्र॰ लमपितस्य स्वतोभिन्नं कारणस्यैव कार्यस्यापि भिन्नकालत्वनियमात्॰ शेत्यादौ तु क्वचित्फलपदमौपचारिकं
१७ द्रष्टव्यं॰ तथा च लब्धस्य ज्ञानमेव यदि शेषज्ञानस्यास्यादित्यर्थः तन्नु तस्य स्वप्रतीतेर्न शेत्यप्रतीतिः फलं॰ कीनु शा
17 कपसेव्यंधकूपलक्षणायाः तथा च न किंचिद्दूषणमिति यत्तूक्तं पयाशंकते वैशेषादसेनः ज्ञानस्याविषयाति
रिक्तं फलमात्रं वा विवक्षितं तेषुपगतेवा॰ आद्ये प्रकृतेप्यस्ति गोस्वामिगतप्रीतिः अन्त्ये प्रयोजनज्ञानएव
व्यभिचारः तेन हि गोस्वामिसंतोषमात्रं तन्यते न तु न तस्य ते किंचिदिति॰ तस्माद्धितुफलयोस्तत्प्रतीतिफ
लप्रतीत्योर्भिन्नकालत्वनाभिन्नव्यापारविषयत्वम समीचीनमेवेति भंजना सिद्धिरित्यत्रतात्पर्यमितिः
तद्बोधविजंभितेन त्वनेन सूत्रेण यथाशंकते नापिज्ञानत्वस्य विषयान्यफलत्वव्याप्यत्वं प्रतियाघतेकिं
तुज्ञानफलत्वस्य विषयान्यत्वव्याप्यत्वं यथा च शेषादेर्लक्षणाजन्यप्रतीतिविषयत्वेन प्रयोजनेन
स्यादिति सर्वदोषानवकाशः अत्राहुः अन्यथानुपपत्त्यादिलक्षणाम संरतियावदन्यथोपपादकं ताव
द्वेवविषयीकरोति न त्वनुपपादकमपीति कथं तत्र पावनत्वमपि कुर्यात्तन्नन्यथानुपपत्त्या कल्प्यमानत्वा राम
पिसानुद्देश्यमपि शेत्यं विषयीकरोति यथाता योपश्रामायापादिपमानेवद्वैशेत्यमपिज्ञनयति चे १७

ततः चंदनस्पर्शे निषिद्धे मा चैराशेरजनकत्वं: लक्षणा पावत्वनुपपत्तिप्रसारितयेतिवेसुम्पात अत्र पक्ष्म मित्या
रभ्पानवकाशात्वं नेयथोबोध्य: लेननारतिः अथपावनत्वादिसामान्यवैशिष्ट्यमेव लक्ष्यतावच्छेदकमस्तु
नस्पप्रतीतत्वादिति चेन्न हि पावनत्वादिविशेषोनप्रतीयतेति किं बहुना गोवीहीकश्चत्रगवाभिन्नजड
स्पलस्पत्वेसेवान्वयानुपपत्तिः उपसंहरति विशिष्टे लक्षणा नैवं एवं उक्तरूपा कथं तर्हि तत्प्रतीतिरि
त्यत आह विशेषास्तु तत्कला चिते तटादौ लक्षिते सति पावनत्वादयो विशेषाः प्रतो विषपा:स्युः तेच प
सिद्धा इति रि अन्यापारगम्या एव सच व्यापारो व्यंजनध्वननादिशब्दवाच्यो वश्यमेषितव्य: कथमन्यथा
विशेषप्रतीतिरिति एवं लक्षणामूलं व्यंजकत्वमुक्तं: अभिधामूलं त्वाह अनेकार्थस्य शब्दस्य वाचक
त्वेनियंत्रिते संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं अनेकार्थस्य शब्दस्य वाचकत्वे संयोगाद्यैर्नियं
त्रिते सति अवाच्यार्थधिहेतुर्व्यापारो अंजनं व्यंजनमित्यर्थः अनेकार्थानेकाभिधानशक्तिः अर्थभेदेना
शब्दभेद इति नयेतु अर्थात्तदभिधानशक्तश्शब्दः सदृशशब्दभेदभ्रमविषयो वा वाचकत्वमभिधाश्र
वाच्यार्थस्तदाभिधाव्यापाराविषयः नियंत्रणं नीयमनं एकतरमात्रस्मारणानुकूलत्वं संयोगादेः शब्दार्थ

का.प्र. स्फुतवच्छेदे विशेषस्मृतिहेतव इति एतेन नीयमानमेतस्मिन्नेगम्य्व साहचर्यं विरोधिता अर्थः प्रकरणं
१८ लिंगं शब्दस्यान्यस्य संनिधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशे
18 षस्मृतिहेतव इति तत्र संयोगः प्रसिद्धार्थस्य गुणविशेषरूपः संबंधः तेनाभिधानीयमनं यथा सशं
खचक्रो हरिरित्यत्र शंखादिसंयोगेनानेकार्थस्य हरिशब्दस्याच्युतेऽभिधानीयम्यते अस्य हरि
पदार्थैः तत्संयोगाभावात् विप्रयोगस्तादृशसंबंधध्वंसस्तेन यथा अशंखचक्रो हरिरित्यच्युतेः
ध्वंसस्य प्रतियोगिपूर्वकत्वात् साहचर्यं सहचरता तेन यथा रामलक्ष्मणाविति रामपदस्य लक्ष्मणसा
हचर्यात् दाशरथ्योः विरोधः सहानवस्थानं वध्यघातकभावश्च तेन यथा छायातपाविति कोसा
दौ शक्तेऽपि छायापदस्यातपाभावेः विरोधिनोः कपोश्चित्तत्वेऽपि मा पाए मार्जुनगतिस्तयोरित्यत्र
रामार्जुनपदयोर्भार्गवकार्तवीर्ययोः अर्थः प्रयोजनं तेन यथा स्थाणुं भज भवच्छिदे इत्यत्र भवच्छेद
रूपप्रयोजनवशात् स्थाणुशब्दस्य भवे प्रकरणं वक्तृश्रोतृबुद्धिस्थता तेन यथा सर्वं जानाति देव इत्यत्र रा.म.
देवशब्दस्य राजनि व्यक्तुपुष्पदर्थं रति व्याख्यानस्याप्रकृते पाजोदाविन्यर्थः विंवासंबोधे शंजादा १८

वित्यर्थः संबोध्यस्यैव पुष्कदर्थत्वात्ः लिंगसंयोगातिरिक्तसंबंधेन पदस्याहतुचोधर्मः तेन यथा॰ कुपितो मक
रध्वजइत्यत्र मकराकारंध्वजस्य मुद्राया व्याहतेन समवायसंबंधवत्ताकोपेन मकरध्वनशब्दस्य कायेपत्तु लिं
गविरुद्धमितितन्न कोपस्यकामविरुद्धत्वाभावात्ः असाधारणधर्मस्यांविरुद्धत्वात्॰ स शंखचक्रइत्यत्रा
ति व्याप्तिप्रसंगाच्च॰ शब्दस्यान्यस्य संनीधिः नीयमार्थकशब्दांतरसामानाधिकरणं॰ अतोभवछि
